# 1 पादपेषु पोषणम्

षष्ठकक्ष्यायां भवन्तः पठितवन्तः यत् सर्वेषां जीवानां कृते भोजनम् आवश्यकं वर्तते । भवन्तः इदमपि पठितवन्तः यत् कार्बोहाइड्रेट, प्रोटीन, वसांशः,जीवसत्त्वं, खनिजं, इत्यादयः भोजनस्य घटकाः सन्ति । भोजनस्य एते घटकाः स्वशरीरसंरक्षणार्थम् आवश्यकाः सन्ति । एते घटकाः **पोषकांशाः** इति कथ्यन्ते ।

सर्वेषां जीवानां कृते भोजनस्य आवश्यकता भवति । पादपाः स्वभोजनं स्वयमेव निर्मातुं शक्नुवन्ति, परन्तु अन्ये (मानवादयः) प्राणिनः स्वभोजनं स्वयमेव निर्मातुं न शक्नुवन्ति । ते प्राणिनः पादपेभ्यः अथवा पादपानां खादितृभ्यः जन्तुभ्यः भोजनं प्राप्नुवन्ति । अतः मानवाः तथा अन्ये प्राणिनः प्रत्यक्षरूपेण अथवा परोक्षरूपेण पादपेषु एव आश्रिताः भवन्ति ।




## १.१ पादपेषु पोषणविधिः

केवलं पादपाः एव एतादृशाः जीवाः सन्ति, ये जलं कार्बन-डाइ ऑक्साइड इति एवं खनिजस्य साहाय्येन स्वभोजनं निर्मातुं शक्नुवन्ति । एते पदार्थाः तेषां परिवेशे उपलभ्यन्ते । पोषकपदार्थाः सजीवानां शारीरिकसंरचनार्थम्, वृध्यर्थम्, तथा च क्षतिग्रस्त-भागानां समीकरणार्थं, सामर्थ्यं ददति, तथा च विभिन्न-जैवप्रक्रमस्य कृते आवश्यकशक्तिम् अपि प्रददति । सजीवद्वारा भोजनग्रहणं तस्य भोजनस्य उपयोगविधिः पोषणम् इति कथ्यते । पोषणस्य सः विधिः यस्मिन् जीवः स्वभोजनं स्वयमेव संश्लेष्टितं करोति, तत् स्वपोषणम् इति कथ्यते । अतः एतादृशाः पादपाः स्वपोषी इति पदेन व्यवह्रियन्ते ।जन्तुः एवम् बहवः अन्ये जीवाः पादपैः संश्लेषितं भोजनं प्राप्नुवन्ति, तत् विषमभोजी इति कथ्यते ।




इदानीं वयं प्रष्टुं शक्नुमः यत् पादपानां खाद्यनिर्माणगृहं (खाद्यागारः) कुत्र वर्तते ? किं भोजनं पादपानां सर्वेषु भागेषु निर्मितं भवति, अथवा केवलं किञ्चित् विशेषभागेषु ? पादपाः स्वपरिवेषात् अपक्वसामग्रीं केन प्रकारेण प्राप्नुवन्ति ? ताः सामग्रीः केन प्रकारेण खाद्यनिर्णाम-गृहपर्यन्तं वहन्ति ?

## १.२ प्रकाशसंश्लेषणम् – पादपेषु खाद्यसंश्लेषणस्य प्रक्रमः




पत्राणि पादपानां खाद्य-निर्माणगृहं वर्तते । पादपेषु खाद्यपदार्थानां संश्लेषणं तेषां (पादपानां) पत्रेषु भवति । अतः सर्वे अपक्वपदार्थाः पत्राणि प्रति गच्छेयुः । मृत्तिकासु उपस्थित-जलम् एवं खनिजं मूलद्वारा निपीताः

भवन्ति, तथा च पत्रपर्यन्तं ऊढाः भवन्ति । पत्रमूलेषु उपस्थित-सूक्ष्म-रन्ध्रद्वारा वायुषु उपस्थितं कार्बन-डाइऑक्साइड प्रविशति । अयं रन्ध्रः द्वारकोशिकाद्वारा आवृत्तः भवति । एतादृशः छिद्रः रन्ध्रः इति उच्यते ।

**कोशिकाः**

भवन्तः दृष्टवन्तः यत् भवनानां निर्माणम् इष्टिकाभिः भवति । तथैव सजीवानां शरीरं सूक्ष्म-अवयवेभ्यः भवति । तस्य नाम कोशिका भवति । कोशिकाः सूक्ष्मदर्शिद्वारा द्रष्टुं शक्नुमः । केषाञ्चन जीवानां निर्माणं केवलम् एक-कोशिकया भवति । कोशिका एकया सूक्ष्म-बाह्य-संरचनया आवृता भवति, यस्य नाम कोशिकावरणं (कोशिकाझिल्ली) कथ्यते । संरचनायां सुस्पष्टा केन्द्रे गोलाकारसंरचना अपि भवति, यस्य नाम केन्द्रकम् अस्ति (चित्रम् १.१)। केन्द्रकं परितः श्यान-सान्द्र-द्रव्येण (जेली) आवृत्तं भवति, यस्य नाम कोशिकाद्रव्यम् इति भवति ।




**चित्रम् १.१- कोशिकारेखाचित्रम्**

जलम् एवं खनिजम्, वाहिकाद्वारा पत्रपर्यन्तम् आगच्छति । एताः वाहिकाः नालिकावत् भवन्ति, तथा मूलम्, शाखा, काण्डः, पत्रम्, आवृताः भवन्ति । पोषकतत्त्वानां पत्रपर्यन्तं प्रापणार्थम् एताः वाहिकाः अविच्छिन्नमार्गं प्रददति । पादपेषु पदार्थस्य परिवहनस्य विषये भवन्तः एकादशे अध्याये पठिष्यन्ति ।



प्रहेलिका, ज्ञातुम् इच्छति यत् पत्रेषु एतादृशी का विशेषता अस्ति यत् खाद्य-पदार्थानां संश्लेषणं कुर्वन्ति, परन्तु पादपानाम् अन्यभागाः न शक्नुवन्ति ।

पत्रेषु अपि हरितवर्णकं भवति, यत् क्लोरोफिल् इति उच्यते । क्लोरोफिल् सूर्यस्य प्रकाशस्य (सौरप्रकाशस्य) ऊर्जायाः सङ्ग्रहणे पत्राणां सहायतां करोति । अस्याः ऊर्जायाः उपयोगः जलमाध्यमेन एवं कार्बन डाइ-ऑक्साइड इति माध्यमेन खाद्यसंश्लेषणे भवति, यतो हि खाद्यसंश्लेषणं सौरप्रकाशस्य उपस्थितौ भवति । अतः अस्य नाम प्रकाशसंश्लेषणं भवति । अतः वयं दृष्टवन्तः यत् क्लोरोफिल्, सूर्यस्य प्रकाशः, कार्बन डाइऑक्साइड, एवं जलम् घटकाः प्रकाशश्लेषणस्य कृते आवश्यकाः भवन्ति । अस्यां पृथिव्याम् अयम् एकः अद्वितीयः प्रक्रमः वर्तते । पत्रद्वारासौर-ऊर्जा सङ्गृहिता भवति, तथा पादपेषु खाद्यरूपेण सञ्चिता भवति । अतः सर्वेभ्यः जीवेभ्यः सूर्यः ऊर्जायाः चरमस्रोतः अस्ति ।

किं भवन्तः कल्पयितुं शक्नुवन्ति, यत् यदि प्रकाशसंश्लेषणं न भविष्यति तदा किं भविष्यति ?

प्रकाशसंश्लेषणस्य अभावे खाद्यस्य उपलब्धिः न भविष्यति । सर्वेषां जीवानाम् अतिजीवनं प्रत्यक्षरूपेण अथवा परोक्षरूपेण पादपद्वारा निर्मितभोजने एव आश्रितं वर्तते । एतस्मात् अतिरिक्तं सर्वेषां जीवानां कृते परमावश्यकम् आक्सीजन् इति अपि प्रकाशसंश्लेषणक्रमे निर्मितं भवति। प्रकाशसंश्लेषणस्य अनुपस्थितौ पृथिव्यां जीवनस्य कल्पना न सम्भवति ।

प्रकाशसंश्लेषणस्य क्रमे पत्राणां क्लोरोफिल-युक्त-कोशिकाः (चित्रम् १.२) सौरप्रकाशस्य उपस्थितौ कार्बन डाइऑक्साइड एवं जलम्, आभ्यां कार्बोहाइड्रेट इति अस्य संश्लेषणं कुर्वन्ति (चित्रम् १.३) । एतं प्रक्रमं

निम्नसमीकरणद्वारा दर्शयितुं शक्नुमः –

कार्बन डाइऑक्साइड+जलम् $\xrightarrow[\text{क्लोरोफिल्}]{\text{सूर्यस्य प्रकाशः}}$ कार्बोहाइड्रेट + आक्सीजन्

अस्मिन् प्रक्रमे ऑक्सीजन निर्मुक्तः भवति। कार्बोहाइड्रेट अन्ततः मंडः (स्टार्च) इत्यत्र परिवर्तितः भवति।




चित्रम्-१.२ क्लोरोफिल-युक्त-कोशिका-दर्शनपूर्वकं पत्राणां छिन्नचित्रम्।

पत्रेषु मण्डस्य उपस्थितिः प्रकाश-संश्लेषण-प्रक्रमस्य सम्पन्नतां दर्शयति। मण्डः अपि कार्बोहाइड्रेट अस्य एकः प्रकारः वर्तते।




चित्रम्- १.३ प्रकाश-संश्लेषण-दर्शनस्य कृते व्यवस्था चित्रम्



जिज्ञासुः पश्यति यत् केषाञ्चित् पादपानां पत्राणि शोणानि (शोणितानि) अथवा नीललोहितानि (बैंगनी) धूसराणि (भूरा) भवन्ति। सः ज्ञातुम् इच्छति यत् किम् एतेषु पत्रेषु अपि प्रकाश-संश्लेषणं भवति।

पत्रेभ्यः अतिरिक्तम्, पादपानां इतर-हरितभागेषु, यथा - हरितशाखासु एवं काण्डेषु प्रकाश-संश्लेषणं भवति।
मरुस्थलीय-पादपेषु वाष्पोत्सर्जनद्वारा जलक्षयस्य न्यूनी-करणाय वल्कसदृशपत्राणि अथवा शूलपत्राणि भवन्ति। एतेषां पादपानां हरितकाण्डाः भवन्ति, एषा प्रकाश-संश्लेषणस्य कार्यं करोति।

## क्रिया-कलापः – १.१

एकस्यैव पादपस्य द्वे पुष्पाधाने (गमला) गृह्णन्तु। एकम् अन्धकारे (अथवा कृष्णपेटिकायाम्) द्विसप्तति-होरापर्यन्तं संस्थापयन्तु। तथा च अन्यत्पात्रं सूर्य-प्रकाशे संस्थापयन्तु। द्वयोः पादपयोः पत्रेषु आयोडीन-परीक्षणं तथैव करोतु यथा पूर्वं षष्ठकक्ष्यायां भवन्तः कृतवन्तः। अवलोकित-अंशान् उल्लिखतु। इदानीं तत् पात्रम् आनयन्तु यत् पूर्वम् अन्धकारे आसीत्, तत् सूर्य-प्रकाशे त्रिचतुरदिनपर्यन्तं संस्थापयन्तु। तथा पुनः एषां पादपानां पत्रेषु आयोडीन-परीक्षणं कुर्वन्तु। निरीक्षितांशान् टिप्पणीपुस्तके लिखन्तु।

हरितपत्रात् अतिरिक्तेषु अन्यपत्रेषु अपि क्लोरोफिल भवति, परन्तु एतत्पत्रेषु उपस्थितरक्तवर्णकः धूसरवर्णकः अथवा अन्यवर्णकः क्लोरोफिल इत्यस्य हरितवर्णान् आच्छादयति (चित्रम् १.४)।



चित्रम् - 1.4 विभिन्न-वर्णानां पत्राणि

भवन्तः भित्तिषु, जलाशये, अथवा स्थिर-जलयुक्त-सरोवरेषु चिक्कण हरित-वर्णयुक्त-खण्डान् दृष्टवन्तः स्युः। एते केषाञ्चित् जीवानां वृद्धिकारणात् भवन्ति तस्य नाम शैवाल इति भवति। किं भवन्तः कल्पयितुं शक्नुवन्ति यत् अस्य पादपस्य हरितवर्णः किमर्थं भवति ? अस्मिन् क्लोरोफिल् भवति अतः एते हरितवर्ण-युक्ताः भवन्ति । शैवालाःअपि प्रकाश-संश्लेषणद्वारा स्वभोजनं निर्मान्ति।

## पादपेषु कार्बोहाइड्रेट अतिरिक्तखाद्यानां संश्लेषणम्

सम्प्रति भवन्तः पठितवन्तः प्रकाश-संश्लेषण-प्रक्रमेण पादपाः कार्बोहाइड्रेट इत्यस्य संश्लेषणं कुर्वन्ति । कार्बोहाइड्रेट इत्यस्य निर्माणं कार्बन्, हाइड्रोजन्, एवम् आक्सीजन् इत्यनेन भवति। एतेषाम् उपयोगः खाद्यस्य अन्यघटकानां संश्लेषणे भवति । परन्तु प्रोटीन इति नाइट्रोजनी पदार्थः वर्तते, यस्मिन् कार्बन, आक्सीजन्, एवं हाइड्रोजन् इत्यतः अतिरिक्तः नाइट्रोजन इत्यपि भवति। पादपाः नाइट्रोजन कुतः प्राप्नुवन्ति ?

संस्मरन्तु, वायौ नाइट्रोजनपदार्थः वायवीय-अवस्थायां (गैसीय-अवस्थायां) प्रचुरमात्रायां भवति, परन्तु पादपाः अस्य निपानम् अस्याम् एव अवस्थायां न कर्तुं शक्नुवन्ति। मृत्तिकायां केचन विशेष-जीवाणवः भवन्ति। एते वायवीय-नाइट्रोजन-पदार्थस्य उपयोगितां सम्पाद्य मृत्तिकायां निर्मुक्तं कुर्वन्ति। एते विलयपदार्थाः पादपद्वारा जलेन सह अवशोषिताः भवन्ति। प्रायः भवन्तः दृष्टवन्तः यत् कृषकाः स्वक्षेत्रे उर्वरकं प्रक्षिपन्ति । अस्मिन् नाइट्रोजनी-पदार्थानां प्रचुरता भवति । अनेन प्रकारेण अन्यसंघटकैः सह पादपानां नाइट्रोजन् इत्यस्य सम्पूर्तिः भवति। तत्पश्चात् पादपाः खाद्यस्य अन्यघटकानां, यथा प्रोटीन् एवं जीवसत्त्वानि इत्यादीनां संश्लेषणं कुर्वन्ति।

## १.३ पादपेषु पोषणस्य अन्यविधयः

केचन पादपाः एवम् अपि भवन्ति, यस्मिन् क्लोरोफिल् न भवति, ते पादपाः स्वभोजनस्य संश्लेषणं कर्तुं न शक्नुवन्ति। ते कथं जीविताः भवन्ति, तथा पोषकान् कथं प्राप्नुवन्ति ? मनुष्यस्य तथा अन्यप्राणिनाम् इव एते पादपाः अपि स्वपोषणार्थम् अन्यपादपैः निर्मित-खाद्यसामग्रीषु निर्भराः भवन्ति। ते विषमपोषिप्रणाल्याः उपयोगं कुर्वन्ति । चित्रम् १.५ ध्यानेन पश्यन्तु, किं भवन्तः एकस्य वृक्षस्य शाखाः काण्डं च पीतवर्ण-संरचना रज्जुवत् आवृणोति इति पश्यन्ति ? अयम् अमरलतानामकः पादपः वर्तते। अस्मिन् क्लोरोफिल् न भवति। एते स्वभोजनं तेभ्यः पादपेभ्यः प्राप्नुवन्ति यस्मिन् एते आरोहिताः भवन्ति। यस्मिन् एते आरोहिताः भवन्ति, सः पादपः परपोषी भवति। यतो हि अमरलतासदृशाः पादपाः परपोषिणम् अमूल्य-पोषक-तत्त्वेभ्यः निवारयन्ति। अतः अस्य नाम परजीवी भवति। किं वयम् एवम् अन्यजीवाः अपि परजीविनः सन्ति ? भवन्तः अत्र विचारयन्तु। स्व-अध्यापकैः सह चर्चयन्तु।



चित्रम् – 1.5 परपोषि-पादपे अमरबेलः



प्रहेलिका ज्ञातुम् इच्छति यत् अस्माकं रक्तपायिनः मशकाः, मत्कुणाः, यूकाः एवं च जलूकासदृशाः जीवाः, परजीविनः सन्ति।



जिज्ञासुः भ्रमितः वर्तते । यदि घटपर्णानि हरित-वर्णयुक्तानि भवन्ति तथा प्रकाश-संश्लेषणं संपादयन्ति, तर्हि इमानि कीटान् किमर्थं भक्षयन्ति।

किं भवन्तः एतादृशान् पादपान् दृष्टवन्तः अथवा तेषां विषये श्रुतवन्तः ये जन्तून् भक्षयन्ति । केचन पादपाः एतादृशाः अपि सन्ति ये कीटान् आकर्षन्ति, तथा तान् पाचयन्ति । किम् एते विस्मयकारिणः न सन्ति ? एतादृशाः पादपाः हरितवर्णकाःअथवा अन्यवर्णकाः भवेयुः। चित्रम् १.६ अस्य पादपं पश्यन्तु। अस्य घटसदृशा अथवा कुम्भसदृशा संरचना वस्तुतः तेषां पत्राणां रूपान्तरितभागः वर्तते। पत्राणां शीर्षभागः आच्छादकं निर्माति। घटस्य अन्तः अनेक-रोमछिद्राणि भवन्ति, तानि सर्वाणि छिद्राणि अधोमुखानि भवन्ति। यदा कोऽपि कीटः अन्तः प्रविशति, तदा सः रोममध्ये बद्धः भवति। घटे उपस्थित-पाचक-रसद्वारा कीटानां पचनं भवति । कीटभक्षकाः एतादृशाः पादपाः कीटभक्षक-पादपाः इति नाम्ना प्रसिद्धाः भवन्ति। वीनस-फ़्लाइ-ट्रैप, तथा सनड्यु इति द्वे कीट-भक्षकपादपानाम् उदाहरणे वर्तेते। एतेषां विषये ज्ञानं प्राप्नुवन्तु।




चित्रम् 1.6 घटपर्णिपादपे (पिचर-पादप) घटस्य इव तथा घटाच्छादकस्य इव संरचना भवति

किम् एतत् संभवं वर्तते, यत् एतादृशाः पादपाः मृद्भ्यः सर्वान् पोषकान् न प्राप्नुवन्ति येषां पोषकाणाम् आवश्यकता वर्तते ?

## १.४ – मृतजीवी

भवन्तः आपणे छत्रकस्य (मशरुम) विक्रयणं पश्यन्ति। (चित्रम् १.७) वर्षाकाले आर्द्रमृत्तिकायाम् अथवा जीर्णकाष्ठेषु छत्रस्य इव संरचनां (गुच्छा) पश्यन्ति । आगच्छन्तु पश्यामः जीवितुं केषां पोषकाणाम् आवश्यकता भवति, तथा सः पोषकः कुतः प्राप्यते ?

जिज्ञासुः ज्ञातुम् इच्छति, यत् एते जीवाः पोषकांशान् कथं प्राप्नुवन्ति। एतेषु मानवानाम् इव मुखं न भवति। एते हरितपादपाः इव न भवन्ति, अस्मिन् क्लोरोफिल् न भवति । अतः प्रकाश-संश्लेषणद्वारा भोजननिर्माणं कर्तुं न शक्नुवन्ति।





चित्रम् – 1.7 छत्रकानां पोटलिका जीर्ण-शीर्ण-वस्तुनि उत्पन्न-छत्रकः

## क्रिया-कलापः १.२

निष्पावरोटिकायाः (ब्रेड) एकं भागं जले निक्षिपन्तु, पुनः एकस्मिन् आर्द्रस्थाने अथवा उष्णस्थाने द्वित्रदिनानि स्थापयन्तु, अथवा तावत्काल-पर्यन्तं स्थापयन्तु यावत्पर्यन्तं तस्मिन् रोमस्य इव संरचना न भवेत् (चित्रम् १.८) । एषा संरचना हरित-धूसर-वर्णस्य अथवा अन्य-वर्णस्य भवितुं शक्नोति । कस्यापि आवर्धनकाचः इत्यनेन अथवा सूक्ष्मदर्शिकायाः साहाय्येन अस्य अवलोकनं कुर्वन्तु । स्वप्रेक्षणं टिप्पणीपुस्तके लिखन्तु । अधिक-संभावना वर्तते, यत् तूलतन्तुवत् (रुई) दृश्येत एषः जीवः कवकः अथवा फंजाई नाम्ना ज्ञायते । अस्य पोषण-प्रणाली अथवा पोषण-विधिः भिन्न-प्रकारिका भवति । एते कवकाः निष्पावरोटिकातः पोषकांशान् निपिबन्ति ।



चित्रम् – 1.8 सुपिष्टकस्य (पावरोटी) उपरि उत्पन्नः कवकः

परिवर्तिताः भवन्ति । तदनन्तरम् अस्य विलयनस्य भोजनरूपेण अवशोषणं कुर्वन्ति । एतां पोषण-प्रणालीं यस्यां जीवाः मृत-विघटित-जैविक-पदार्थेन पोषकतत्त्वानि प्राप्नुवन्ति, मृतजीवि-पोषणं कथयन्ति । मृतजीवि-पोषण-प्रणाल्याः उपयोगं कुर्वन्तः पादपाः मृतजीवी इति नाम्ना प्रसिद्धाः भवन्ति ।

कवकाः अवलेहे, चर्मणि, वस्त्रेषु एवम् अन्य-पदार्थेषु प्रादुर्भवन्ति । एते तत्रापि उद्भवन्ति यत्र उष्णस्थानम् अथवा शीतस्थानं भवेत् ।

कवकानां वृद्ध्यर्थं वर्षर्तौ समीचीनं भवति । अत एव वर्षाकाले कवकाः वस्तूनि नाशयन्ति । कवकद्वारा हानि-विषये पालकैः सह चर्चां कुर्वन्ति ।

प्रहेलिका ज्ञातुम् इच्छति यत् तस्याः शोभनं पादत्राणं, यत् सा विशेषावसरे धरति, वर्षाकाले कवक-कारणात् नष्टम् अभवत् वा इति, सा ज्ञातुम् इच्छति वर्षाकाले कवकाः सहसा कुतः आपतन्ति ।



सामान्यतः कवकानां बीजाणवः वायौ उपस्थिताः भवन्ति । यदा ते आर्द्रयुक्त-उष्णपदार्थेषु तिष्ठन्ति, तदा अङ्कुरिताःभूत्वा नवीन-कवकान् उत्पादयन्ति । किम् इदानीं भवन्तः वक्तुं शक्नुवन्ति,यत् वयं स्व-वस्तूनि कवक-दूषणात् कथं रक्षयिष्यामः ?

जिज्ञासुः स्मरति, यत् तस्य पितामहः उक्तवान् आसीत् यत् एकदा तस्य गोधूम-क्षेत्रं कवकैः नष्टम् अभूत् । सः सम्प्रति ज्ञातुम् इच्छति यत् किं कवकः रोगकारकः अपि भवति ?



केचन जीवाः मिलित्वा जीवन्ति । ते वासस्थानं स्वपोषक-तत्त्वानि च विनिमयन्ते । अस्य नाम सहजीवि-संबन्धः भवति । उदाहरणम्, केचन कवकाः वृक्षाणां मूलभागे भवन्ति । वृक्षाः कवकानां कृते पोषणं प्रददति, विनिमयेन कवकाः अपि जलं तथा कानिचन पोषकतत्त्वानि वृक्षेभ्यः ददति ।

प्रहेलिका ज्ञापितवती यत् कवकसदृशाः सुरामण्डाः यीस्ट तथा छत्रकाः उपयोगिनः अपि भवन्ति । परन्तु केचन कवकाः पादपेषु जन्तुषु एवं मनुष्येषु रोगम् उत्पादयन्ति । केषाञ्चन कवकानाम् उपयोगः औषधरूपेण अपि भवति ।



शैवलं नाम्ना प्रसिद्धाः जीवाः द्विविधाः भवन्ति । एकः शैवालः, द्वितीयः कवकः वर्तते । शैवाले क्लोरोफिल् भवति, परन्तु कवके क्लोरोफिल् न भवति । कवकाः शैवालानां कृते स्थानं जलं तथा खनिजान् यच्छन्ति, विनिमयेन शैवालः कवकानां कृते प्रकाश-संश्लेषणद्वारा संश्लेषित-खाद्यं यच्छति ।

### १.५ मृत्तिकासु पोषकांशानां पुनः सम्पूर्तिः कथं भवति ?

कृषकाः क्षेत्रेषु उर्वरकस्य अथवा रसायनसाराणां प्रसारणं कुर्वन्ति । उद्यानपालकाः तृणक्षेत्रेषु अथवा घटेषु एतेषां उपयोगं कुर्वन्ति इति भवन्तः दृष्टवन्तः किम् ? एवं किमर्थं कुर्वन्ति इति भवन्तः जानन्ति किम् ?

भवन्तः पठितवन्तः यत् पादपाः मृत्तिकाभ्यः खनिज-पोषक-तत्त्वानि निपिबन्ति । अतः मृत्तिकासु एतस्य मात्रा क्रमशः क्षीयते । उर्वरके तथा रासायनिकसारे नाइट्रोजन, पोटैशियम, फास्फोरस सदृशाः पादप-पोषकाः भवन्ति । पादपद्वारा सर्वदा उपयोगकारणात् मृत्तिकासु तेषां मात्रा शनैः शनैः न्यूनीभवति । एतत्कारणात् मृत्तिकानां कृते भूमौ उर्वरकस्य तथा जैविकस्य आवश्यकता भवति । यदि पादपानां पोषकांशानां आवश्यकतायाः ज्ञानं स्यात्, तर्हि वयं नहि केवलं पादपान् उत्पादयितुं शक्नुमः, अपितु तान् बलवतः कर्तुं शक्नुमः ।

प्रायः सस्यपादपाः मृत्तिकातः अधिकांशं नाइट्रोजन् निपिबन्ति । तेन मृत्तिकायां नाइट्रोजनस्य अभावः भवति । यद्यपि वायौ नाइट्रोजन-वायुः प्रचुर-मात्रायाम् उपलब्धः भवति, परन्तु पादपाः एतस्य उपयोगं तथा करणे असमर्थाः भवन्ति, यथा ते कार्बन-डाइऑक्साइड इत्यस्य उपयोगं कुर्वन्ति। पादपाः नाइट्रोजन-पदार्थं विलेयरूपेण एव अपेक्षन्ते । केचन रायिजोबियम नामकाः जीवाणवः वायुमण्डलीय.-नाइट्रोजनपदार्थं विलयपदार्थ-रूपेण परिवर्तयन्ति । परन्तु रायिजोबियमजीवाणवः स्वभोजनं स्वयमेव न निर्मान्ति । अतः एते चणकः, निष्पावः, मुद्गः, शिम्बी च एतेषां तथा च अन्य-शमीपादपानां मूलभागे भवन्ति, तथा च तेभ्यः नाइट्रोजन-पदार्थं यच्छन्ति । अधिकांशतः द्विदलपदार्थः फलयुक्त-पादपेभ्यः प्राप्नोति, विनिमयेन पादपाः राइजोबियम-जीवाणूनां कृते आवासं तथा च खाद्यं ददति । अतः तयोः मध्ये सहजीवि-संबन्धः भवति । अयं संबन्धः कृषकाणां कृते विशेष-महत्त्वपूर्णः भवति । यत्र शमीपादपाः वर्धिताः भवन्ति तत्र ते नाइट्रोजन् रसायनसारस्य उपयोगस्य न्यूनीकुर्तुं शक्नुवन्ति । तथा च अपरः अपि लाभः भवति, यत् द्विदल-सस्यकर्तनानन्तरम् अन्य-सस्यस्य कृते सामान्यतः उर्वरकस्य आवश्यकता न भवति । अस्मिन् अध्याये भवन्तः पठितवन्तः यत् अधिकांशतः पादपाः स्वपोषिणः भवन्ति । बहु-स्वल्प-पादपाः एव परजीविनः अथवा मृतजीविनः भवन्ति । परजीविनः तथा च मृतजीविनः पादपाः जीवेभ्यः पोषणं प्राप्नुवन्ति । सर्वे प्राणिनः स्वभोजनाय पादपेषु तथा च अन्य-प्राणिषु निर्भराः भवन्ति, अतः ते विषम-पोषिणः भवन्ति । किं वयं वक्तुं शक्नुमः यत् कीटभक्षिणः पादपाः आंशिक-विषमपोषिणः सन्ति ?

## प्रमुख-शब्दाः

| | | |
|---|---|---|
| स्वपोषी | कीटभक्षीय | मृतजीवी |
| क्लोरोफिल् | पोषकांशः | रन्ध्रः |
| विषमपोषी | परजीवी | पोषणम् |
| परपोषी | प्रकाश-संश्लेषणम् | मृतजीवीय |

## भवन्तः किं ज्ञातवन्तः

- सर्वेभ्यः जीवेभ्यः खाद्यस्य आवश्यकता भवति, यस्य उपयोगं ते स्ववृद्ध्यर्थं, शरीर-संरक्षणार्थं, तथा आवश्यकोर्जा-प्राप्त्यर्थं कुर्वन्ति।
- हरितपादपाः प्रकाश-संश्लेषणद्वारा स्वखाद्यस्य संश्लेषणं स्वमेव कुर्वन्ति।
- हरितपादपाः कार्बन-डाइऑक्साइड, जलम् एवं खनिजम् इति सदृशानां रासायनिक-पदार्थानाम् उपयोगं खाद्य-संश्लेषणार्थं कुर्वन्ति।
- प्रकाश-संश्लेषणार्थं क्लोरोफिल एवं सूर्यप्रकाशस्य महती आवश्यकता भवति।
- कार्बोहाइड्रेट सदृशः जटिल-रासायनिक-पदार्थः प्रकाश-संश्लेषणस्य उत्पादः वर्तते।
- प्रकाश-संश्लेषणस्य प्रक्रमे पत्रेषु पादपेषु उपस्थ्तं क्लोरोफिल् सौर-उर्जां निपिबन्ति।
- प्रकाश-संश्लेषणे आक्सीजन-पदार्थः मुक्तः भवति। अस्य आक्सीजनपदार्थस्य उपयोगः सर्वे जीवाः अतिजीवनार्थं कुर्वन्ति।
- कवकाः स्वपोषणं मृत-जैवपदार्थेन अथवा अपघटित-जैवपदार्थेन प्राप्नुवन्ति। ते मृतजीविनः भवन्ति। अमरलता-सदृशाः पादपाः परजीविनः भवन्ति। ते परपोषि-पादपात् स्वभोजनं प्राप्नुवन्ति।
- केचन पादपाः एवम् अन्ये सर्वे जीवाः स्वपोषणार्थम् अन्यजीवेषु निर्भराः भवन्ति, अतः विषमपोषिणः भवन्ति।

## अभ्यासः

1. जीवाः किमर्थम् आहारं स्वीकुर्वन्ति ?
2. परजीवि-मृतजीविनोः मध्ये भिन्नतां कुर्वन्तु।
3. भवान् पत्रेषु मण्डः (स्टार्च) इत्यस्य उपस्थितेः परीक्षणं कथं करिष्यन्ति ?
4. हरितपादपेषु खाद्य-संश्लेषण-प्रक्रमस्य संक्षिप्त-विवरणं यच्छन्तु ?
5. केनचित् प्रवाह-चित्र-माध्यमेन दर्शयन्तु यत् पादपाः भोजनस्य मूलभूत-स्रोतांसि सन्ति।
6. रिक्तस्थानानि पूरयन्तु –

   (क) यतोहि हरितपादपाः स्वभोजनं स्वयमेव निर्मान्ति, एतदर्थम् अस्य नाम .................... .......... भवति।

   (ख) पादपद्वारा संश्लेषित-खाद्यस्य सङ्ग्रहः ...................... रूपेण भवति।

(ग) प्रकाश-संश्लेषलस्य प्रक्रमे येन वर्णकेन सौर-ऊर्जा-निपानं भवति, सः . . . . . . . . . . . . . . . . . . .. .. . ... .. ... . . . ..इति कथ्यते।

(घ) प्रकाश- संश्लेषणे पादपाः वायु-मण्डलात् . . . . . . . .. . . . . . . . . . . . . . .स्वीकुर्वन्ति, तथा . . . . . . . . . . . . . . . . . . . .मोचयन्ति ।

7. निम्न-कथनात् संबद्ध-पारिभाषिक-शब्दान् ज्ञापयन्तु –

(क) पीत-कृश शाखीयकाण्डः परजीवी पादपः।

(ख) आंशिक-स्वपोषी पादपः।

(ग) ते रन्ध्राः, यैः पत्रेषु वायोः विनिमयः भवति।

8. समीचीने उत्तरे (✓) रेखाङ्कनं कुर्वन्तु।

(क) अमरलता उदाहरणं वर्तते।

i. स्वपोषिणः
ii. परजीविनः
iii. मृतजीविनः
iv. परपोषिणः

(ख) कीटभक्षकस्य पादपस्य नाम अस्ति।

i. अमरलता
ii. जपाकुसुमः
iii. घटपर्णी
iv. पाटलम्

9. अ कोष्ठकानां शब्दानां सम्मेलनं ब कोष्ठकैः शब्दैः सह कुर्वन्ति।

| | |
|---|---|
| (क) क्लोरोफिल | (क) जीवाणुः |
| (ख) नाइट्रोजन | (ख) विषमपोषी |
| (ग) अमरलता | (ग) घटपर्णी |
| (घ) जन्तुः | (घ) पत्रम् |
| (ङ) कीटभक्षी | (ङ्) परजीवी |

10. निम्नाङ्कित-कथनेषु सत्य-असत्य-कथनानां चयनं कुर्वन्तु

(क) प्रकाश-संश्लेषणे कार्बनडाइ-ऑक्साइड मुक्तः भवति।

(ख) एतादृशाः पादपाः ये स्वभोजनस्य स्वयमेव संश्लेषणं कुर्वन्ति, मृतजीविनः भवन्ति।

(ग) प्रकाश-संश्लेषणस्य उत्पादः प्रोटीन नास्ति।

(घ) प्रकाश-संश्लेषणे सौर-ऊर्जायाः रासायनिक-ऊर्जायां रूपान्तरणं भवति।

**समीचीनम् उत्तरं चिन्वन्तु -**

11. पादपस्य कः भागः प्रकाश-संश्लेषणार्थं वायोः कार्बन-डाइऑक्साइड स्वीकरोति।

(क) मूलरोम

(ख) रन्ध्रः

(ग) पर्णसिराः

(घ)पुष्पदलानि

12. वायुमण्डलात् मुख्यतः येन भागेन पादपाः कार्बन-डाइऑक्साइड प्राप्नुवन्ति, तस्य नाम

(क) मूलम्

(ख) काण्डः

(ग) पुष्पम्

(घ) पत्रम्

**विस्तारितः अधिगमः - गतिविधयः परियोजनाकार्याणि च**



चित्रम्- १.९ प्रकाश-संश्लेषणस्य अध्ययनार्थं प्रयोगः

१. पुष्पाधानस्य विस्तृत-पत्रयुक्त-पादपं गृह्णन्तु । कृष्ण-कागदस्य द्वौ पट्टौ गृहित्वा तयोः मध्ये लघुमापस्य वर्गाकाराकृतिं कर्तयन्तु । कागदेन कयोश्चित् द्वयोः पत्रयोः आच्छादनम् एतादृशं कुर्वन्तु यथा तयोः कश्चन भागः कृष्ण-कर्गदेन आच्छादितः भवेत्, तथा शेषभागः कर्तित-वर्गाकार-आकृति-कारणात् अनाच्छादितः स्यात् । तदनन्तरम् अस्योपरि सावधानेन सन्दंशद्वयम् (चिमटा) स्थापयन्तु (चित्रम् १.९) । पादपान् द्विदिनात् पञ्चदिनपर्यन्तं सूर्यस्य प्रकाशे स्थापयन्तु । इदानीं पत्रस्य आच्छादितम् अनाच्छादितं भागं पश्यन्तु, किम् आच्छादित-अनाच्छादितयोः मध्ये भेदः वर्तते ? अनयोः मध्ये एकस्य आयोडीन-परीक्षणं कुर्वन्तु । इदानीं द्वितीय-पत्रात् कागदम् अपसार्य पादपं द्वित्रदिनानि कृते सूर्यस्य प्रकाशे स्थापयन्तु, पुनः आयोडीन-परीक्षणं कुर्वन्तु । स्वप्रेक्षणानां व्याख्यां कुर्वन्तु -
आच्छादित-पत्रस्यापि आयोडीन-परीक्षणं कुर्वन्तु । सम्प्रति स्वप्रेक्षणस्य व्याख्यां कुर्वन्तु ।

२. यदि भवतां गृहं निकषा (समीप) हरितगृहम् अस्ति चेत्, तत्र गच्छन्तु । पश्यन्तु, तत्र पादपाः कथम् उत्पाद्यन्ते । अन्वेषणं कुर्वन्तु पादपानां स्वास्थ्यवर्धनार्थं तत्र प्रकाशस्य जलस्य तथा कार्बन-डाइऑक्साइड इत्यस्य यन्त्रणं कथं भवति ।

३. मिष्टालुकस्य केवलं जले उत्पादनस्य प्रयत्नं कुर्वन्तु । स्वप्रयोगस्य एवं पेक्षणस्य वर्णनं कुर्वन्तु ।

www.phschool.com/science/biology_place/biocoach/photosynth/overview.htm

**किं भवन्तः जानन्ति ?**

पादपानां कृते प्रकाशः अत्यधिक-महत्त्वपूर्णः वर्तते । यतोहि अत्यधिक-प्रकाश-संश्लेषणेन पादपाः स्वस्थाः भवन्ति । प्रकाश-संश्लेषणं पत्रेण भवति ।